# स्वामी आगमानन्दः

Smt. P. K. MADHURI,
SELECTION GRADE LECTURER IN SANSKRIT,
SREE SANKARA COLLEGE, KALADY.

भारताम्बायाः दार्शनिकमुखे फालतिलकायिताः विराजन्ते केरलीयाः श्रीशङ्करभगवत्पादाः। अद्वैतामृतं पिबतां तेषां महात्मनां पन्थानमनुगच्छन्तः श्रीनारायणगुरु-चट्टम्पिस्वामिप्रभृतयः बहवः महापुरुषाः स्वकीयैः जन्मभिः कैरलीं पवित्रीचक्रुः। तच्छ्रेण्यां श्रीशङ्करमहाविद्यालयस्य तथा कालटिगताद्वैताश्रमस्य च स्थापकः स्वामी आगमानन्दः अस्माकं प्रातःस्मरणीयः भवति। स्वामी आगमानन्दः षण्णवत्यधिकाष्टशताधिकसहस्रतमे क्रिस्त्वब्दे आगस्तमासि सप्तविंशतिदिने भूजातः। करुनागप्पल्लिदेशे पन्मनचोलायां पुतुमनमठे नारायणर्-परमेश्वर् आसीत् तस्य पिता। माता च वटश्शेरीमठे लक्ष्मीदेवी अन्तर्जनञ्च। तस्य पूर्वाश्रमे कृष्णन् नम्ब्यातिरि इत्यासीत् नाम। बाल्य एव सः कृष्णः संस्कृतभाषापाटवमविन्दत। अष्टादशोत्त-रनवशताधिकसहस्रतमे वर्षे मदिरास्देशीयप्रसिडन्सिमहाविद्यालयात् प्रथमश्रेण्यां बिरुदानन्तरबिरुदमलभत। तदनन्तरं

ब्रह्मानन्दस्वामिभ्यः मन्त्रदीक्षां स्वीकृतवान्। अष्टाविंशत्युत्तरनवशताधिकसहस्रतमे क्रिस्त्वब्दे निर्मलानन्दस्वामिभ्यः सः आगमानन्द इति नाम्ना संन्यासं स्वीचकार।

ततः उत्तरभारतं गतः स्वामी तत्रैव स्वशिष्टजीवितं नेतुं निश्चितोऽपि अपूर्वया कयापि दिव्यया प्रेरणया स्वदेशं प्रत्यावर्तत। कालटिदेशं स्वकर्मक्षेत्रतया स्वीकृतवान् च।

**आश्रमस्थापनम्**

आदिशङ्करस्य जन्मस्थानं केनापि अविदितमज्ञातं तथा सर्वैरपि तिरस्कृतञ्चासीत्। मानी आगमानन्दः कालटिं लोकविश्रुतं विधातुमिच्छन् तदानीन्तनं भूस्वामिनं परयत्त् गोविन्दमेनोन् महोदयं प्राप्य साहाय्यं प्रार्थयामास। सोऽपि स्वामिनः अभिमतं विदित्वा पूर्णानद्याः समीपे विस्तृतं भूभागं तद्गतमालयञ्च आश्रमस्थापनायादात्। १९३६ वर्षे श्रीशङ्करजयन्तीदिने श्रीमदागमानन्दः अद्वैताश्रमं स्थापितवान्। अद्वैततत्त्वस्थापनाय प्रचारणाय च श्रीशङ्करेण आत्मनः ह्रस्वं जीवितं समर्पितमिति चिन्तयन् अद्वैताश्रम इति तस्य नाम चकार। गच्छति काले अयमाश्रमः १९४१ वर्षे बेलूरमठादनुज्ञां लब्ध्वा श्रीरामकृष्णाद्वैताश्रम इति नाम्ना प्रथितः अभूत्। आश्रमस्य प्रचालनाय स्वामी दुस्सहान् क्लेशान् अनुबभूव। आत्मना लिखितानां ग्रन्थानां क्रयणेन मतप्रभाषणेन च आश्रमपरिपालनाय धनं सम्पादितवान् सः।

संस्कृतपाठनार्थं एका शास्त्रीपर्यन्ता संस्कृतपाठशाला स्वामिना अरब्धा। तत्र गिरिजनानां हरिजनानाञ्च सात्विकं विद्याभ्यासं दातुं तेभ्यः एकं निवासस्थानमपि तेनारब्धम्। इदानीं सा पाठशाला ब्रह्मानन्दोदयविद्यालय इति नाम्ना प्रचलति।

**श्रीशङ्करमहाविद्यालयः**

ततः १९५४ वर्षे मट्टूरदेशे श्रीशङ्करस्य नामधेये एकः महाविद्यालयः श्रीशङ्करमहाविद्यालयः इति स्वामिना आरब्धः। मातरं प्रणम्य मट्टूरदेशात् श्रीशङ्करः स्वकीया जैत्रयात्रा आरब्धा इति चिन्ता मट्टूर् देशे एव महाविद्यालयं स्थापयितुं स्वामिनं प्रेरितवान्। इदानीं श्रीशङ्करमहाविद्यालयस्य चालनं शृङ्गेरीमठस्थानां श्रीशङ्कराचार्याणामधीनं भवति। शारदाविद्यालयः, आदिशङ्करसाङ्केतिकमहाविद्यालयः, श्रीशङ्कराध्यापकपरिशीलनमहाविद्यालयः इत्यादिसोदरस्थापनैः इदानीं श्रीशङ्करमहाविद्यालयः वृद्धिं प्राप्नोति।

श्रीशङ्कराचार्यविश्वविद्यालयः स्वामिनः महान् स्वप्नः आसीत्। सः इदानीं साक्षात्कृतः विराजते। श्रीशङ्करसेतुनिर्माणेऽपि स्वामी आशयदाता श्रमदाता चासीत्। एवं अद्वैताश्रमस्थापकः, विद्याभ्यासविचक्षणः, सामूह्यपरिष्कर्ता, हरिजनोद्धारकः, दीनजनबन्धुः इत्यादिविविधविशेषणैः श्लाघनीयः आगमानन्दः आधुनिककालटिदेशस्य नवोत्थाननायकः इति निस्संशयं वक्तुं शक्यते।

१९६१ वर्षे एप्रिल् मासि सप्तदशदिने स्वामी आगमानन्दः स्वकीयं भौतिकं जीवितं तत्याज। स्वर्गस्थोऽपि सः केरलीयानां विशेषतया कालटिवासिनां मनसि इदानीमपि जीवति इत्येतत् महान् शुभोदयः भवति।

स्वकीयैः सरसैः प्रभाषणैः केरलीयग्रामेषु पर्यटन् स्वामी सामान्यजनान् धार्मिकं पन्थानं निनाय। अधःस्थितान् हरिजनान् जिरिजनान् च भारतीयसंस्कृतेः महत्त्वमुपदिशन् सः तान् आध्यात्मिकतया उद्धर्तुं प्रयतत। एवमविकसितं कालटिदेशं स्वकीयकर्मपद्धतीभिः लोकेषु महोन्नतं स्थानं प्रापयन् आगमानन्दः केरलीयः विवेकानन्द इति कीर्तनीयः भवति।

**तेषां कृतयः**

१। अपरोक्षानुभूतिः, प्रबोधसुधाकरः, विवेकचूडामणिः इत्यादिभगवत्पादग्रन्थानां केरलीयपरिभाषा।

२। धर्मः इति स्वतन्त्रो ग्रन्थः।

३। वीरवाणी इति चतुर्षु भागेषु प्रसिद्धीकृतलेखनानां प्रभाषणानां च समाहारः।

आधारः-वीरवाणी (प्रथमो भागः) स्वामी गणानन्देन परिशोधिता, श्रीरामकृष्णसंस्थया प्रसाधिता च।